# Turiyatita Upanishad

# તુરીયાતીતોપનિષત્

## Document Information

Text title : Turiyatita Upanishad

File name : turiya.itx

Category : upanishhat

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 64 / 108; Shukla Yajurveda - Sanyasa upanishad

Latest update : Mar. 21, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# તુરીયાતીતોપનિષત્

ૐ તુરીયાતીતોપનિષદ્વેદ્યં યત્પરમાક્ષરમ્ ।
તત્તુર્યાતીતચિન્માત્રં સ્વમાત્રં ચિન્તયેઽન્વહમ્ ॥

તુરીયાતીતસંન્યાસપરિવ્રાજાક્ષમાલિકા ।
અવ્યક્તૈકાક્ષરં પૂર્ણા સૂર્યાક્ષ્યધ્યાત્મકુણ્ડિકા ॥

હરિઃ ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અથ તુરીયાતીતાવધૂતાનાં કોઽયં માર્ગસ્તેષાં કા
સ્થિતિરિતિ પિતામહો ભગવન્તં પિતરમાદિનારાયણં
પરિસમેત્યોવાચ।
તમાહ ભગવન્નારાયણો યોઽયમવધૂતમાર્ગસ્થો લોકે
દુર્લભતરો નતુ બાહુલ્યો યદ્યેકો ભવતિ સ એવ નિત્યપૂતઃ સ એવ
વૈરાગ્યમૂર્તિઃ સ એવ જ્ઞાનાકારઃ સ એવ વેદપુરુષ ઇતિ
જ્ઞાનિનો મન્યન્તે ।
મહાપુરુષો યસ્તચ્ચિત્તં મય્યેવાવતિષ્ઠતે ।
અહં ચ તસ્મિન્નેવાવસ્થિતઃ સોઽયમાદૌ તાવત્ક્રમેણ
કુટીચકો બહૂદકત્વં પ્રાપ્ય બહૂદકો હંસત્વમવલમ્બ્ય
હંસઃ પરમહંસો ભૂત્વા સ્વરૂપાનુસન્ધાનેન
સર્વપ્રપઞ્ચં વિદિત્વા દણ્ડકમણ્ડલુકટિસૂત્ર-
કૌપીનાચ્છાદનં સ્વવિધ્યુક્તક્રિયાદિકં સર્વમપ્સુ
સંન્યસ્ય દિગમ્બરો ભૂત્વા વિવર્ણજીર્ણવલ્કલાજિન-
પરિગ્રહમપિ સંત્યજ્ય તદૂર્ધ્વમમન્ત્રવદાચરન્ક્ષૌરા-
ભ્યઙ્ગસ્નાનોર્ધ્વપુણ્ડ્રાદિકં વિહાય લૌકિકવૈદિકમ-
પ્યુપસંહૃત્ય સર્વત્ર પુણ્યાપુણ્યવર્જિતો જ્ઞાનાજ્ઞાનમપિ

વિહાય શીતોષ્ણસુખદુઃખમાનાવમાનં નિર્જિત્ય વાસનાત્રય-
પૂર્વકં નિન્દાનિન્દાગર્વમત્સરદમ્ભદર્પદ્વેષકામક્રોધલોભ
મોહહર્ષામર્ષાસૂયાત્મસંરક્ષણાદિકં દગ્ધ્વા સ્વવપુઃ
કુણપાકારમિવ પશ્યન્નયત્નેનાનિયમેન લાભાલાભૌ સમૌ
કૃત્વા ગોવૃત્ત્યા પ્રાણસન્ધારણં કુર્વન્યત્પ્રાપ્તં તેનૈવ
નિર્લોલુપઃ સર્વવિદ્યાપાણ્ડિત્યપ્રપઞ્ચં ભસ્મીકૃત્ય સ્વરૂપં
ગોપયિત્વા જ્યેષ્ઠાજ્યેષ્ઠત્વાનપલાપકઃ સર્વોત્કૃષ્ટત્વ-
સર્વાત્મકત્વાદ્વૈતં કલ્પયિત્વા મત્તો વ્યતિરિક્તઃ કશ્ચિન્ના-
ન્યોઽસ્તીતિ દેવગુહ્યાદિધનમાત્મન્યુપસંહૃત્ય દુઃખેન નોદ્વિગ્નઃ
સુખેન નાનુમોદકો રાગે નિઃસ્પૃહઃ સર્વત્ર શુભાશુભયો-
રનભિસ્નેહઃ સર્વેન્દ્રિયોપરમઃ સ્વપૂર્વાપન્નાશ્રમાચારવિદ્યા-
ધર્મપ્રાભવમનનુસ્મરન્ત્યક્તવર્ણાશ્રમાચારઃ સર્વદા
દિવાનક્તસમત્વેનાસ્વપ્નઃ સર્વદાસંચારશીલો
દેહમાત્રવશિષ્ટો જલસ્થલકમણ્ડલુઃ સર્વદાનુન્મત્તો
બાલોન્મત્તપિશાચવદેકાકી સંચરન્નસંભાષણપરઃ
સ્વરૂપધ્યાનેન નિરાલમ્બમવલમ્બ્ય સ્વાત્મનિષ્ઠાનુકૂલેન
સર્વં વિસ્મૃત્ય તુરીયાતીતાવધૂતવેષેણાદ્વૈતનિષ્ઠાપરઃ
પ્રણવાત્મકત્વેન દેહત્યાગં કરોતિ યઃ સોઽવધૂતઃ  સ
કૃતકૃત્યો ભવતીત્યુપનિષત્ ॥

ૐ તત્સત્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ તુરીયાતીતોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Turiyatita Upanishad*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*